# chamtkArachintAmaNi by bhattanArAyaNa

# ચમત્કારચિન્તામણિઃ ભત્તનારાયણકૃતઃ

## Document Information

Text title : chamatkArachintamaNI

File name : chamatkarachintamani.itx

Category : jyotisha, sociology_astrology

Location : doc_z_misc_sociology_astrology

Author : bhattanArAyaNa

Transliterated by : Radu Canahai clradu at yahoo.com

Proofread by : Radu Canahai clradu at yahoo.com

Latest update : July 30, 2005, July 5, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# ચમત્કારચિન્તામણિઃ ભત્તનારાયણકૃતઃ

ઓંસર્વવિઘ્નહર્ત્રે શ્રીગનેશાય નમઃ ।
શ્રીસૂર્યાદિનવગ્રહેભ્યોનમઃ ।
અથ માલવિયદય્વજ્ઞધર્મેશ્વરકૃત અન્વયાર્થપ્રબોધપ્રદીપટીકાસહિત
શ્રીનારાયણભત્ત-કૃત ચમત્કાર-ચિન્તામણિઃ
શ્રીદુર્ગાશરણાખ્યા મણિપ્રભાટીકા-ટિપ્પણી સમ્પાદકીયા
અથ ગ્રન્થકર્તુઃ ભત્તનારાયણસ્ય મંગલાચરણમ્ -
લસત્ પીતપટ્ટામ્બરં કૃષ્ણચન્દ્રં મુદારાધયાડલિઙ્ગતં વિદ્યુતેવ ।
ધનં સમ્પ્રણમ્યાત્ર નારાયણાખ્યઃ ચમત્કારચિન્તામણિં સમ્પ્રવક્ષ્યે ॥ ૧॥

ક્વણત્ કિંકિંણીજાલ કોલાહલાઢ્યં લસત્ પીતવાસોવસાનં ચલંતમ્ ।
યશોદાંગણે યોગિનામપ્યગમ્યં ભજેઽહં મુકુન્દં ધનશ્યામવર્ણમ્ ॥ ૨॥

ચતુર્લક્ષજ્યોતિર્મહાંબોધિમુચ્ચૈઃ પ્રમથ્યૈવ વિદ્વદ્જનાનન્દહેતોઃ ।
પરં યુક્તિરમ્યં સુસંક્ષિપ્તશબ્દં ભુજંગપ્રયાતૈઃ પ્રબન્ધં કરોમિ ॥ ૩॥

ન ચેત્ ખેચરાઃ સ્થાપિતાઃ કિં ભચક્રે ન ચેત્ સ્પષ્ટગાઃ સ્થાપિતાઃ કિં ગ્રહેન્દ્રૈઃ ।
અભાવોદિતા સ્પષ્ટાકોઽત્રહેતુઃ ફલૈરેવપૂર્વં બ્રુવે તાનિ તસ્માત્ ॥ ૪॥

---

અથ સૂર્યફલમ્ -
તનુસ્થો રવિઃ તુંગયષ્ટિં વિધત્તે મનઃ સંતપેત્ દારદાયાદવર્ગાત્ ।
વપુઃ પીડ્યતે વાતપિત્તેન નિત્યંસ વૈ પ્રયટન્ હ્રાસવૃદ્ધિં પ્રયાતિ ॥ ૧॥

ધનભાવ -
ધને યસ્ય ભાનુઃ સ ભાગ્યાધિકઃ સ્યાત્ ચતુષ્પાત્ સુખં સદ્વ્યયે સ્વં ચ યાતિ ।
કુટુમ્બે કલિઃ જાયયા જાયતેઽપિ ક્રિયા નિષ્ફલા યાતિ લાભસ્ય હેતોઃ ॥ ૨॥

તૃતીય ભાવ ફલ -
તૃતીયે યદોઽહર્મણિર્જન્મકાલે પ્રતાપાધિકં વિક્રમં ચાઽ।તનોતિ ।

તદા સોદરૈસ્તપ્યતે તીર્થચારી સદોઽરિક્ષયઃ સંગરે શં નરેશાત્ ॥ ૩॥

ચતુર્થભાવફલ -

તુરીયે દિનેશેઽતિશોભાધિકારી જનઃ સંલ્લભેત્ વિગ્રહે બંધુતોઽપિ ।

પ્રવાસી વિપક્ષાહવે માનભઙ્ગં કદાચિન્ન શાન્તં ભવેત્ તસ્ય ચેતઃ ॥ ૪॥

પંચમભાવ -

સુતસ્થાનગે પૂર્વજન્માપત્યતાપી કુશાગ્રામતિઃ ભાસ્કરે મંત્રવિદ્યા ।

રતિઃ વંચને સંચકોઽપિ પ્રમાદી મૃતઃ ક્રોડરોગાદિજા ભાવનીયા ॥ ૫॥

ષષ્ટ્ઃઅભાવ -

રિપુધ્વંસકૃદ્ભાસ્કરો યસ્ય ષષ્ઠે તનોતિ વ્યયં રાજતો મિત્રતોઽપિ ।

કુલે માતુરાપદ્ ચતુષ્પાદતોવા પ્રયાણે નિષાદૈઃ વિષાદં કરોતિ ॥ ૬॥

સપ્તમભાવ -

દ્યુનાથો યદા દ્યુનજાતો નરસ્ય પ્રિયાતાપનં પિડપીડા ચ ચિન્તા ।

ભવેત્ તુચ્છલબ્ધિઃ ક્રયેવિક્રયેઽપિ પ્રતિસ્પર્ધયા નૈતિ નિદ્રાંકદાચિત્ ॥ ૭॥

અષ્ટમભાવ -

ક્રિયા લમ્પટં ત્વષ્ટમે કષ્ટભાજં વિદેશીયદારાન્ ભજેદ્ વાપ્યવસ્તુ ।

વસુક્ષીણતા દસ્યુ તો વા વિલમ્વાદ્ વિપદ્ ગુહ્યતાં ભાનુરુગ્રાં વિધત્તે ॥ ૮॥

નવમભાવ -

દિવાનાયકે દુષ્ટા કોણયાતે ન ચાપ્નોતિ ચિંતા વિરામોઽસ્ય્ ચેતઃ ।

તપશ્ચર્યયાઽનિચ્છયાઽપિ પ્રયાતિ ક્રિયાતુંગતાં તપ્યતે સોદરેણ ॥ ૯॥

દશમભાવ -

પ્રયાતોઽશુભાન્ યસ્ય મેષૂરણેઽસ્ય શ્રમઃ સિધિદો રાજતુલ્યો નરસ્ય ।

જન્યાસ્તથા યાતનામાતનોતિક્લમઃ સંક્રમેત્ બલ્લભૈઃ વિપ્રયોગઃ ॥ ૧૦॥

એકાદશભાવ -

રવૌ સંલ્લભેત્ સ્વં ચ લાભોપયાતે નૃપદ્વારતો રાજમુદ્રાધિકારાત્ ।

પ્રતાપાનલે શત્રવઃ સમ્પતન્તિ શ્રિયોઽનેકધા દુઃખમઙ્ગોદ્ભવાનામ્ ॥ ૧૧॥

દ્વાદશભાવ -

રવિર્દ્વાદશે નેત્રદોષં કરોતિ વિપક્ષાહવે જાયતેઽસૌ જયશ્રીઃ ।

સ્થિતિર્લબ્ધયા લીયતે દેહદુઃખં પિતૃવ્યાપદો હાનિરધ્વપ્રદેશે ॥ ૧૨॥

અથ ચન્દ્રફલ

પ્રથમસ્થાન કા ચન્દ્ર

વિધુર્ગોકુલીરાજગઃ સન્ વપુસ્થો ધનાધ્યક્ષલાવણ્યમાનંદપૂર્ણમ્ ।
વિધતે ધનં ક્ષીણદેહં દરિદ્રં જડં શ્રોત્રહીનં શેષલગ્ને ॥ ૧॥

દ્વિતીયભાવ કા ચન્દ્ર -

હિમાંશૌ વસુસ્થાનગે ધાન્યલાભઃ શરીરેઽતિસૌખ્યં વિલાસોઽગનાનામ્ ।
કુટુમ્બે રતિઃ જાયતે તસ્ય તુચ્છં વશં દર્શને યાતિ દેવાંગનાઽપિ ॥ ૨॥

તૃતીયભાવ કા ચન્દ્ર -

વિધૌ વિક્રમે વિક્રમેર્ણૈતિ વિત્તં તપસ્વી ભવેદ્ભામિની રંજિતોઽપિ ।
કિયચ્ ચિંતયેત્ સાહજં તસ્યશર્મ પ્રતાપોજ્જ્વલો ધર્મિણો વૈજયન્ત્યા ॥ ૩॥

અથ ચતુર્થ ચન્દ્ર ફલ -

યદા બંધુગ વાન્ધવૈરત્રિજન્મા નૃપદ્વારિ સર્વાધિકારી સદૈવ ।
વયસ્યાદિમે તાદૃશં નૈવ સૌખ્યં સુતસ્ત્રીગણાત્ તોપ માયાતિ સમ્યક્ ॥ ૪॥

અથ પઞ્ચમ ચન્દ્ર ફલ -

યદા પઞ્ચમે યસ્ય નક્ષત્રનાથો દદાતીહ સંતાનસંતોષમેવ ।
મતિનિર્મલાં રત્નલાભં ચ ભૂમિં કુસીદેન નાનાપ્તયો વ્યાવસાયાત્ ॥ ૫॥

અથ છઠે ભાવ મેં ચન્દ્ર કા ફલ -

રિપૌ રાજતે વિગ્રહેણાઽપિ રાજા જિતાસ્તેઽપિ ભૂયો વિધૌ સંભવન્તિ ।
તદગ્રેઽરયોનિષ્પ્રભા ભૂયસોઽપિ પ્રતાપોજ્વલો માતૃશીલોનતદ્વત્ ॥ ૬॥

અથ સપ્તમ ચન્દ્ર ફલ -

દદેદ્ દારશં સપ્તમે શીતરશ્મિઃ ધનિત્વં ભવેદ્ધ્વવાણિજ્યતોઽપિ ।
રતિં સ્ત્રીજને મિષ્ટભુક્ લુબ્ધચેતાઃ કૃશઃ કૃષ્ણપક્ષે વિપક્ષાભિભૂતઃ ॥ ૭॥

અષ્ટમભાવસ્થિત ચન્દ્ર કા ભાવફલ -

સભા વિધતે ભૈષજી તસ્યગેહે પચેત્ કર્હિચિત્ ક્વાથમુદ્રોદકાનિ ।
મહાવ્યાધયો ભીતયો વારિભૂતાઃ શશીક્લેશકૃત્ સંકટાન્યષ્ટમસ્થઃ ॥ ૮॥

નવમભાવસ્થિત ચન્દ્ર કા ફલઃ -

તપોભાવગસ્તારકેશો જનસ્ય પ્રજાશ્ચ દ્વિજાઃ વેદિનઃ તં સ્તુવન્તિ ।
ભવત્યેવ ભાગ્યાધિકો યૌવનાદેઃ શરીરે સુખં ચન્દ્રવત્ સાહસં ચ ॥ ૯॥

દશમભાવસ્થિત ચન્દ્રફલ -
સુખં વાન્ધવેભ્યઃ ખગે ધર્મકર્મા સમુદ્રાંગજેશં નરેશાદિતોઽપિ ।
નવીનાંગના વૈભવે સુપ્રિયત્વં પુરા જાતકે સૌખ્યમલ્પં કરોતિ ॥ ૧૦॥

એકાદશભાવસ્થિત ચન્દ્રફલ -
લભદ્ ભૂમિપાદિદુના લભગેન પ્રતિષ્ઠાધિકારામ્બરાણિ ક્રમેણ ।
શ્રિયોઽથસ્ત્રિયોઽન્તઃપુરે વિશ્રમન્તિ ક્રિયા વૈકૃતી કન્યકા વસ્તુલાભઃ ॥ ૧૧॥

દ્વાદશભાવસ્થિત ચન્દ્રફલ -
શશી દ્વાદશે શત્રુનેત્રાદિચિંતા વિચિંત્યા સદા સદ્વ્યયો મંગલેન ।
પિતૃવ્યાદિ માત્રાદિતોઽન્તવિષાદો ન ચાપ્નોતિ કામં પ્રિયાલ્પપ્રિયત્વમ્ ॥ ૧૨॥

---

અથ ભૌમસ્ય લગ્નાદિ દ્વાદશભાવ ફલમ્
વિલગ્ને કુજે દણ્ડલોહાગ્નિભીતિસ્તપેન્ માનસં કેસરી કિં દ્વિતીયઃ ।
કલત્રાદિઘતઃ શિરોનેત્રપીડા વિપાકેફલાનાં સદૈવોપસર્ગઃ ॥ ૧॥

ભવેત્તસ્ય કિં વિદ્યમાને કુતુમ્બે ધનેઽઙ્ગારકે યસ્ય લબ્ધે ધને કિમ્ ।
યથા ત્રાયતે મર્કટઃ કંઠહારં પુનઃ સમ્ભુખં કો ભવેદ્ વાદભગ્નઃ ॥ ૨॥

કુતો બાહુવીર્યં કુતો બાહુલક્ષ્મીસ્તૃતીયો ન ચેન્ મઙ્ગલો માનવાનામ્ ।
સહોત્થવ્યથા ભણ્યતે કેન નેષાં તપશ્ચર્યયા ચોપહાસ્યઃ કથં સ્યાત્ ॥ ૩॥

યદા ભૂસુતઃ સંભવેત્તુર્યભાવે તદા કિં ગ્રહાઃ સાનુકૂલા જનાનામ્ ।
સુહૃદ્વર્ગસૌખ્યંનકિઞ્ચિત્ વિચિન્ત્યં કૃપાવસ્ત્રભૂમીઃ લભેદ્ભૂમિપાલાત્ ॥ ૪॥

કુજે પંચમ જાઠરાગ્નિર્વલીયાન્ ન જાતં ન જાંત નિહન્ત્યેક એવ ।
તદાનીમનલ્પા મતિઃ કિલ્વિષેઽપિ સ્વયં દુગ્ધવત્ તપ્યતેઽન્તઃ સદૈવ ॥ ૫॥

ન તિષ્ઠન્તિ ષષ્ઠેઽરયોઽંગારકે વૈ તદંગૈરિતાઃ સંગરે શક્તિમન્તઃ ।
મનીષી સુખી માતુલેયો ન તદ્વન્ વિલીયેત વિત્તં લભેત્તાપિ ભૂરિ ॥ ૬॥

અનુધ્દારભૂતેન પાણિગ્રહેણ પ્રયાણેન વાણિજ્ય તો નો નિવૃત્તિઃ ।
મુહુર્ભગદઃ સ્પર્ધિનાં મેદિનીજઃ પ્રહારાર્દનૈઃ સપ્તમે દમ્પતિઘ્નઃ ॥ ૭॥

શુભાસ્તસ્ય કિં ખેચરાઃ કુર્યુરન્યે વિધાનેઽપિચેદષ્ટમે ભૂમિસૂનુઃ ।
સખા કિં ન શત્રુયતે સત્કૃતોઽપિ પ્રયત્નેકૃતે ભૂયતે ચોપસર્ગેઃ ॥ ૮॥

મહોગ્રા મતિર્ભગ્યવિત્તં મહોગ્રં તપોભાગ્યગો મંગલસ્તત્ કરોતિ ।

ભવેન્નાદિયઃ શ્યાલકઃ સોદરો વા કુતો વિક્રમસ્તુચ્છલાભે વિપાકે ॥ ૯॥

કુલે તસ્ય કિં મંગલં મંગલોનો જનૈર્ભૂયતે મધ્યભાવે યદિ સ્યાત્ ।
સ્વતઃ સિધ્દ એવાવતંસીયતેઽસૌ વરાકોઽપિ કણ્ઠીરવઃ કિં દ્વિતીયઃ ॥ ૧૦॥

કુજઃ પીડયેલ્લાભગોઽપત્યશત્રુન્ ભવેત્ સંમુખો દુર્મુખોઽપિપ્રતાપાત્ ।
ધનં વર્ધતે ગોધનૈઃ વાહનૈર્વા સકૃચ્છૂન્યતાર્થે ચ પૈશુન્યભાવાત્ ॥ ૧૧॥

શતાક્ષોઽપિ તત્ સક્ષતો લોહઘાનૈઃ કુજો દ્વાદશોઽર્થસ્ય નાશં કરોતિ ।
મૃપા કિંવદંતી ભયં દસ્યુતો વા કલિઃ પારધી હેતુ દુઃખં વિચિંત્યમ્ ॥ ૧૨॥

---

અથ બુધસ્ય લગ્નાદિ દ્વાદશભાવફલમ્ -
બુધો મૂર્તિગો માર્જયેદન્યરિષ્ટંવરિષ્ટાધિયા વૈખરી વૃત્તિભાજઃ ।
જના દિવ્યચામીકરીભૂતદેહાશ્ચિકિત્સાવિદો દુશ્ચિકિત્સ્યા ભવન્તિ ॥ ૧॥

ધને બુધ્દિમાન્ બોધને બાહુતેજાઃ સભાસંગતો ભાસતે વ્યાસ એવ ।
પૃથૂદારતા કલ્પવૃક્ષસ્ય તદ્વદ્ બુધૈર્ભણ્યતે ભોગતઃ ષટ્પદોઽયમ્ ॥ ૨॥

તૃતીય ભાવ -
વણિઙ્મિત્રતા પણ્યકૃદ્વૃત્તિશીલો વશિત્વં ધિયો દુર્વશાનામુપૈતિ ।
વિનીતોઽતિભોગં ભજેત્ સંન્યસેધ્દા તૃતીયેઽનુજૈરાશ્રિતો જ્ઞે લતાબાન્ ॥ ૩॥

ચતુર્થભાવ
ચતુર્થે ચરેત્ ચન્દ્રજશ્ચારુ મિત્રો વિશેષાધિકૃદ્ ભૂમિનાથો ગણસ્ય ।
ભવેલ્ લેખકો લિખ્યતે વા તદુક્તં તદાશાપરઃ પૈતૃકં નો ધનં ચ ॥ ૪॥

પઞ્ચમભાવ
વયસ્યાદિમે પુત્રગર્ભો ન તિષ્ઠેત્ ભવેત્ તસ્ય મેધાઽર્થસંવાદયિત્રી ।
બુધૈર્ભણ્યતે પઞ્ચમે રોહિણેયે કિયદ્ વિદ્યતે કૈતવસ્યાભિચારમ્ ॥ ૫॥

ષષ્ટઃઅભાવ -
વિરોધો જનાનાં નિરોધો રિપુણાં પ્રબોધો યતીનાં ચ રોધોઽનિલાનામ્ ।
બુધે સદ્વ્યયે વ્યાવહારો નિધીનાં બલાદર્થકૃત્ સંભવેચ્છત્રુભાવે ॥ ૬॥

સપ્તમભાવ -
સુતઃ શીતગોઃ સપ્તમે શં યુવત્યા વિધત્તે તથા તુચ્છ વીર્યં ચ ભોગે ।
જતસ્તં ગતો હેમવદ્ દેહશોભાં ન શક્નોતિ સત્સમ્પદો વાનુકર્તુમ્ ॥ ૭॥

અષ્ટમભાવ -

શતંજીવિનો રંધ્રગે રાજપુત્રે ભવન્તીહ દેશાન્તરે વિશ્રુતસ્તે ।
નિધાનં નૃપદ્ વિક્રયાદ્ વા લભન્તે યુવત્યુદ્ભવં ક્રીડનં પ્રીતિમન્તઃ ॥ ૮॥

નવમભાવ -

બુધે ધર્મગે ધર્મશીલોઽતિધીમાન્ ભવેદ્ દીક્ષિતઃ સ્વર્ધુનીસ્નાતકોવા ।
કુલોદ્યોતકૃદ્ભાનુવદ ભૂમિપાલાત્ પ્રતાપાધિકો વાધકો દુર્મુખાનામ્ ॥ ૯॥

દશમભાવ -

મિતં સંવદેન્નો મિતં મંલભેત્ પ્રમાદાદિવૈકારિ સૌરાજવૃત્તિઃ ।
બુધે કર્મગે પૂજનોયો વિશેપાત્ પિતુઃ સમ્પદો નીતિદણ્ડાધિકારાત્ ॥ ૧૦॥

એકાદશભાવ -

વિના લાભભાવસ્થિતં ભેશજાતં ન લાભો ન લાવણ્યમાનૃણ્યમસ્તિ ।
કુતઃ કન્યકોદ્વાહદાનં ચ દેયં કથં ભૂસુરાસ્ત્યક્તતૃષ્ણા ભવન્તિ ॥ ૧૧॥

દ્વાદશભાવ -

ન ચેદ્ દ્વાદશે યસ્ય શીતાંશુજાતઃ કથં તદ્ગૃહં ભૂમિદેવા ભજન્તિ ।
રણે વૈરિણો ભીતિભાયાન્તિ કસ્માદ્ હિરણ્યાદિકોશં શઠઃ કોઽનુભૂયાત્ ॥ ૧૨॥

---

અથ ગુરોઃ લગ્નાદિ દ્વાદશભાવફલમ્ -

ગુરુત્વં ગુણૈર્લગ્નગે દેવપૂજ્યે સુવેશી શુખી દિવ્યદેહોઽલ્પવીર્યઃ ।
ગતિર્ભાવિની પારલોકી વિચિન્ત્યા વસૂનિ વ્યયં સંબલેન બ્રજન્તિ ॥ ૧॥

દ્વિતીયભાવસ્થ ગુરુફલમ્

કવિત્વેમતિઃ દંડનેતૃત્વશક્તિઃ મુખે દોષધૃક્ શીઘ્રભોગાર્ત એવ ।
કુતુમ્બે ગુરૌ કષ્ટતો દ્રવ્યલબ્ધિઃ સદા નો ધનં વિશ્રમેદ્ યત્નતોઽપિ ॥ ૨॥

તૃતીયભાવસ્થ ગુરુફલ -

ભવેદ્ યસ્ય દુશ્ચિક્યગો દેવમંત્રી લઘૂનાં લઘીયાન્ સુખં સોદરા નામ્ ।
કૃતઘ્નો ભવેત્ મિત્ર સાર્થે ન મૈત્રિ લલાટોદયેઽપ્યર્થલાભો ન તદ્વત્ ॥ ૩॥

ચતુર્થભાવસ્થ ગુરુર્ફલ -

ગૃહદ્વારતઃ શ્રિયતે વાજિહ્રેષા દ્વિજોચ્ચારિતો વેદઘોષોઽપિ તદ્વત્ ।
પ્રાતિસ્પર્દ્ધિનઃ કુર્વતે પારિચાર્ય્યં ચતુર્થે ગુરૌ સપ્તમન્તર્ગતંચ ॥ ૪॥

પંચમભાવગત ગુરુ કા ફલ -

વિલાસે મતિઃ બુદ્ધિગેદેવપૂજ્યે ભવેજ્જલ્પકઃ કલ્પકો લેખકો વા ।
નિદાને સુતે વિદ્યમાનેઽતિ ભૂતિઃ ફ્લોપદ્રવઃ પક્વકાલે ફ્લસ્ય ॥ ૫॥

ષષ્ઠમસ્થ ગુરુફલમ્ -
રુજાર્તો જનન્યા રુજઃ સંભવેયૂ રિપૌ વાક્પતૌ શત્રુહંતૃત્વમેતિ ।
વલાદુધ્ધતઃ કો રણે તસ્ય જેતા મહિષ્યાદિશર્મા ન તન્ માતુલાનામ્ ॥ ૬॥

સપ્તમભાવસ્થ ગુરુફલમ્ -
મતિઃ તસ્યબહ્વી વિભૂતિશ્ચવહ્વી રતિર્વૈભવેદ્ભામિનીમવહ્વીઃ ।
ગુરુર્વર્ગકૃદ્ યસ્ય જામિત્રભાવે સમ્પિડાધિકોઽખંડ કંદર્પ એવ ॥ ૭॥

અષ્ટમભાવસ્થ ગુરુર્ફલમ્ -
ચિરં નો વસેત્ પૈતૃકે ચૈવગેહે ચિરસ્થાયિનો તદ્ગૃહં તસ્ય દેહમ્ ।
ચિરં નો ભવેત્ તસ્ય નીરોગભંગં ગુરુર્મૃત્યગો તસ્ય વૈકુંઠગતા ॥ ૮॥

નવમભાવસ્થિતગુરુફલમ્ -
ચતુર્ભૂમિકં તદ્ગૃહં તસ્ય ભૂમિપતેર્વલ્લભોવલ્લભા ભૂમિદેવાઃ ।
ગુરૌ ધર્મગે બાન્ધવાઃ સ્યુર્વિનીતાઃ સદાલસ્યતોધર્મવૈગુણ્યકારી ॥ ૯॥

દશમસ્થગુરુફલમ્ -
ધ્વજામંડપે મંદિરે ચિત્રશાલા પિતુઃ પૂર્વજેભ્યોઽપિ તેજોઽધિકત્વમ્ ।
ન તુષ્ટોભવેચ્છમણા પુત્રકાણો પચેત્ પ્રત્યહં પ્રસ્થસામુદ્રમન્નમ્ ॥ ૧૦॥

એકાદશભાવસ્થગુરુફલમ્ -
અકુપ્યં ચ લાભે ગુરૌ કિં ન લભ્યં વદન્ત્યષ્ટધીમન્ત મન્યે મુનીન્દ્રાઃ ।
પિતુઃ ભારભૃતઃ સ્વાંગજાસ્તસ્ય પંચ પરાર્થસ્તદર્થો ન ચેદ્ વૈભવાય ॥ ૧૧॥

દ્વાદશસ્થગુરુર્ફલમ્ -
યશઃ કીદૃશં સદ્વ્યયે સાભિમાને મતિઃ કીદૃશી વંચનાચેત્ પરેષામ્ ।
વિધિઃ કિદશોઽર્થસ્ત્ય નાશો હિ યને ત્રયસ્તે ભવેયુઃ વ્યયે યસ્ય જીવઃ ॥ ૧૨॥

---

પ્રથમભાવસ્થ શુક્રફલ -
સમીચીનમંગં સમીચીનમંગઃ મમીચીનવહ્નંગના ભોગ યુક્તઃ ।
સમીચીનકર્મા સમીચીનશર્મા સમીચીન શુક્રો યદાલગ્નવર્તી ॥ ૧॥

દ્વિતીયભાવગત શુક્રફલ -
મુખં ચારુભાપં મનીષાપિ ચાર્વિં મુખં ચારુ ચારૂણિ વાસાંસિ તસ્ય ।

કુટુમ્બે સ્થિતઃ પૂર્વદેવસ્ય પૂજ્યઃ કુટુમ્બેન ચારુ ચાર્વઙ્ગિકામઃ ॥ ૨॥

તૃતીયભાવ ગતશુક્ર કા ફલ -
રતિઃ સ્ત્રીજને તસ્ય નો બંધુનાશો ગુરુર્યસ્ય દુશ્ચિક્યગો દાનવાનામ્ ।
ન પૂર્ણો ભવેત્ પુત્રસૌખ્યેઽપિ સેનાપતિઃ કાતરો દાનસંગ્રામકાલે ॥ ૩॥

ચતુર્થભાવ કા શુક્રફલઃ -
મહિત્વેઽધિકો યસ્ય તુર્યેઽઽસુરેજ્યો જનૈઃ કિં જનૈશ્ચાપરૈરુષ્ટ તુષ્ટૈઃ ।
કિયત્ પોષયેત્ જન્મતઃ સંજનન્યા અધીનાપિ તોપાયનૈરેવ પૂર્ણઃ ॥ ૪॥

પઞ્ચમભાવ કા શુક્રફલ -
સપુત્રેઽપિ કિં યસ્ય શુક્રો ન પુત્રે પ્રયાસેન કિં યત્નસમ્પાદિતોઽર્થ ।
વ્યુદર્કં વિના મન્ત્રમિષ્ટાશનાભ્યામધીતેન કિં ચેત્ કવિત્વેન શક્તિઃ ॥ ૫॥

ષષ્ઠભાવગત શુક્ર કા ફલ -
સદા દાનવેજ્યે સુધાસિક્ત શત્રુઃ વ્યયઃ શત્રુગે ચૌત્તમૌ તૌ ભવેતામ્ ।
વિપદ્યેત સમ્પાદિતં ચાપિકૃત્યં તપેત્ મન્ત્રતઃ પૂજ્યસૌખ્યં ન ધત્તે ॥ ૬॥

સપ્તમભાવગત શુક્ર કા ફલ -
કલત્રે કલત્રાત્ સુખં નોકલત્રાત્ કલત્રં તુ શુક્રે ભવેત્ રત્નગર્ભમ્ ।
વિલાસાધિકો ગણ્યતે ચ પ્રવાસી પ્રયાસાત્પકઃ કે ન મુહ્યતિ તસ્માત્ ॥ ૭॥

અષ્ટમભાવગત્ શુક્ર કા ફલ -
જનઃ ક્ષુદ્રવાદી ચિરંચારુ જીવેત્ ચતુષ્પાત્ સુખં દૈત્યપૂજ્યો દદાતિ ।
જનુષ્યષ્ટમે કષ્ટસાધ્યોજયાર્થઃ પુનઃ વર્ધતે દીયમાનં ધનર્ણમ્ ॥ ૮॥

નવમભાવસ્થિત શુક્ર કા ફલ -
ભૃગૌત્રિકોણે પુરે કે ન પૌરાઃ કુમિદેન યે વૃદ્ધિમસ્મૈ દદીરન્ ।
ગૃહજ્ઞાપ્તે તસ્યધર્મધ્વજાદેઃ સહોત્થાદિ સૌખ્યં શરીરે સુખં ચ ॥ ૯॥

દશમભાવગત શુક્ર કા ફલ -
ભૃગુઃ કર્મગોગોત્રવીર્યમ્ । ગોત્રબીજમ્ । રૂણદ્ધિ ક્ષયાર્થોભ્રમઃ કિન્ન આત્મીય એવ ।
તુલામાનતો હાટકં વિપ્રવૃત્યા જનાડમ્બરૈઃ પ્રત્યહં વા વિવાદાત્ ॥ ૧૦॥

એકાદશભાવસ્થિત શુક્ર કે ફલ -
ભૃગુઃ લાભગો યસ્ય લગ્નાત્ સુરૂપં મહીપં ચ કુર્યાચ્ચ સમ્યક્ ।
લસત્ કીર્તિ સત્યાનુરાગં ગુણાઢ્યં મહાભોગમૈશ્વર્યયુક્તમ્ સુશીલમ્ ॥ ૧૧॥

વ્યયસ્થાનગત શુક્ર કે ફલ -

કદાપ્યેતિ વિત્તં વિલીયેત્ પિત્તં સિતો દ્વાદશે કેલિસત્કર્મ શર્મા ।
ગુણાનાં ચ કીર્તેઃ ક્ષયં મિત્રવૈરં જનાનાં વિરોધં સદોऽસૌ કરોતિ ॥ ૧૨॥

---

શનેઃ લગ્નાદિદ્વાદશભાવફલમ્

શનિ કે પ્રથમસ્થાન કે ફલ -

ધનેનાતિપૂર્ણોऽતિતૃષ્ણો વિવાદી તનુસ્થેऽર્કજે સ્થૂલદૃષ્ટિર્નરઃ સ્યાત્ ।
વિપં દૃષ્ટિજં સ્વાધિકૃત્વ્યાધિવાધાઃ સ્વયં પીડિતો મત્સરાવેશ એવ ॥ ૧॥

ધનભાવસ્થ શનિ કે ફલ -

સુખાપેક્ષયા વર્જિતોऽસૌ કુટુમ્બાત્ કુટુમ્બે શનૌ વસ્તુ કિ કિન ભુક્તે ।
સમં વક્તિ મિત્રેણ તિક્તં વચોऽપિ પ્રસક્તિ વિના લોહકં કો લભેત્ ॥ ૨॥

તૃતીયભાવસ્થ શનિ કે ફલ -

તૃતીયે શનૌ શીતલં નૈવ ચિત્તાંજના દુર્ઘભાજ્જાયતે યુક્તમાપી ।
અવિઘ્નં ભવેત્ કર્વિચિન્નૈવભાગ્યં દૃઢાશઃ સુખી દુર્મુખઃ સત્કૃતોऽપિ ॥ ૩॥

ચતુર્થભાવસ્થ શનિ કે ફલ -

ચતુર્થે શનૌ પૈકૃતં યાતિ દૂરં ધનં મંદિરં બંધુવર્ગાપવાદઃ ।
પિતુશ્ચાપિ માતુશ્ચ સંતાપકારી ગૃહે વાહને હાનયો વાતરોગી

પડમ્ચ ભાવસ્થ શનિ કે ફલ -

શનૌ પઞ્ચમે ચ પ્રજા હેતુ દુઃખી વિભૂતિચલા તસ્યબુદ્ધિર્ન શુદ્ધા ।
રતિ દૈવતે શબ્દશાસ્ત્રે ન તદ્વત્ કલિર્મિત્રતો મન્ત્રતઃ ક્રોऽપીડા ॥ ૫॥

ષષ્ઠથાન કે શનિ કે ફલ -

અરેર્ભૂપતેશ્ચૌરતો ભીતયઃ કિ યદિનસ્ય પુત્રો ભવેદ્ યસ્ય શત્રૌ ।
ન યુદ્ધે ભવેત્સંમુખે તસ્ય યોદ્ધા મહિષ્યાદિકં માતુલાનાં વિનાશઃ ॥ ૬॥

સપ્તમસ્થાન મે શનિ કે ફલ -

સુદારા ન મિત્રં ચિરં ચારુ વિત્તં શનૌ દ્યુનગે દમ્પતી રોગયુક્તૌ ।
અનુત્સાહસન્તપ્તકૃદ્ હીનચેતાઃ કુતોવીર્યવાન્ વિહ્વલો લોલુપઃ સ્યાત્ ॥ ૭॥

અષ્ટમસ્થાન મે શનિ કે ફલ -

વિયોગો જનાનાં ત્વનૌપાધિકાનાં વિનાશો ધનાનાં સ કો યસ્ય ન સ્યાન્ ।
શનૌ રંધ્રગે વ્યાધિતઃ ક્ષુદ્રદર્શી તદગ્રે જનઃ કૈતવં કિ કરોતુ ॥ ૮॥

નવમસ્થાન મેં શનિ કે ફલ -

મતિસ્તસ્યત્તિક્તા ન તિક્તં સુશીલં રતિર્યોગશાસ્ત્રે ગુનોરાજસઃ સ્યાત્ ।
સુહૃદ્વર્ગતો દુઃખિતો દીનબુદ્ધ્યા શનિઃ ધર્મગઃ કર્મકૃત્ સંન્યસેદ્ધા ॥ ૯॥

દશમસ્થાન મે શનિ કે ફલ -
અજાતમ્ય માતાપિતા બાહુરેવ વૃથા મર્વતો દુષ્ટ કર્માધિપત્યાત્ ।
શનૈરેહને કર્મગઃ શર્મ મંદો જયે વિગ્રહે જીવિકાનાં તુ યસ્ય ॥ ૧૦॥

લાભભાવગત શનિ કે ફલ -
સ્થિરં વિત્તમાયુઃ સ્થિરં માનમં ચ સ્થિરા નૈવ રોગાદયો ન સ્થિરાણિ ।
અપત્યાનિ શૂરઃ શતાદેક એવ પ્રપંચાધિકો લાભગે ભાનુપુત્રે ॥ ૧૧॥

વ્યયસ્થાન મે શનિ કે ફલ -
વ્યયસ્થે યદા સૂર્યસૂનૌ નરઃ સ્યાદશૂરોઽથવા નિસ્ત્રયો મંદનેત્રઃ ।
પ્રસન્નો વહિઃ નોગૃહે લગ્નપશ્ચેદ્ વ્યયસ્થોરિપુધ્વંસકૃદ્ યગ◌ં◌્યભોક્તા ॥ ૧૨॥

---

રાહુ કે દ્વાદશભાવ્ ફલ -
સ્વવાક્યે સમર્થઃ પરેષાં પ્રતાપાત્ પ્રભાવાત્ સમાચ્છાદયેત્ સ્વાન્ પરાર્થાન્ ।
તમોયસ્ય લગ્ને સ ભગ્નારિવીર્યઃ કલત્રેઽધૃતિ ભૂરિદારોઽપિ યાયાત્ ॥ ૧॥

ધનભાવગત રાહુ કે ફલ -
કુટુંબે તમો નષ્ટભૂતં કુટુંબં મૃષાભાષિતા નિર્ભયો વિત્તપાલઃ ।
સ્વવર્ગપ્રણાશો ભયંશસ્ત્રતઃ ચેદવશ્યં ખલેભ્યો લભેત્ પારવશ્યમ્ ॥ ૨॥

તૃતીય ભાવસ્થ રાહુ કે ફલ -
ન નાગોઽથ સિંહો ભુજાવિક્રમેણ પ્રયાતી હ સિંહી સુતે તત્સમત્વમ્ ।
તૃતીયે જગત્સોદરત્વં સમેતિ પ્રયાતોઽપિ ભાગ્યં કુતો યત્ન હેતુઃ ॥ ૩॥

ચતુર્થભાવગત રાહુ કે ફલ -
ચતુર્થે તથં માતૃનૈરુજર્યદેહો હૃદિજ્વાલ્યા શીતલં કિં વહિઃ સ્યાત્ ।
સ ચેન્નથા મેષગઃ કર્કગો વા બુધર્ક્ષેઽસુરો ભૂપતેર્વન્ધુરેવ ॥ ૪॥

પઞ્ચભાવગત્રાહુ કે ફલ -
સુતે તત્સુતોત્પતિ કૃત્ સિંહિકાયાઃ સુતોભામિનિચિંતયા ચિત્તતાપઃ ।
સતિ ક્રોડરોગે કિમાહારહેતુઃ પ્રપઞ્ચન કિં પ્રાપકંદૃષ્ટવર્જ્યમ્ ॥ ૫॥

ષષ્ઠભાવગત રાહુ કે ફલ -
વલં બુધિવીર્યં ધનં તદ્વશેન સ્થિતો વૈરિભાવેઽયેષાં જનાનામ્ ।

રિપૂણામરણ્યં દહેદેવ રાહુઃ સ્થિરં માનસં તત્તુલા નો પૃથિવ્યામ્ ॥ ૬॥

સપ્તમભાવગત રાહુ કે ફલ -

વિનાશંલભેયુઃ દ્યુને તદ્યુવત્યો રુજા ધાતુપાકાદિના ચન્દ્રમર્દી ।

કટાહે યથા લોડયેત્ જાતવેદા વિયોગાપવાદાઃ શર્મં ન પ્રયાન્તિ ॥ ૭॥

અષ્ટમ્ભાવગત રાહુ કે ફલ -

નૃપૈઃ પણ્ડિતૈઃ વન્દિતોનિન્દિતઃ સકૃદ્ભાગ્યલાભોऽસકૃદ્ ભ્રંશ એવ ।

ધનં જાતકં તં જનાશ્ચ ત્યજંતિ શ્રમગ્રન્થિ કૃદ્રંધ્રગો વ્રધ્નશત્રુઃ ॥ ૮॥

નવમભાવગત રાહુ કે ફલ -

મનીષી કૃતં ન ત્યજેત્ બંધુવર્ગં સદા પાલયેત્ પૂજિતઃ યાદ્ગુણૈઃ સ્વૈઃ ।

સભાદ્યોતકો યસ્ય ચેત્ ત્રિત્રિકોણે તમઃ કૌતુકી દેવતીર્થે દયાલુઃ ॥ ૯॥

દશમભાવગત રાહુ કે ફલ

સદામ્લેચ્છસંસર્ગેતોऽતીવગર્વં લભેત્ માનિની કામિની ભોગમુચ્ચૈઃ ।

જનૈર્વ્યાકુલોऽસૌ સુખં નાધિશેતે મદાર્થવ્યયી ક્રૂરકર્મા ખગેऽગૌ ॥ ૧૦॥

એકાદશથાનગત રાહુ કે ફલ -

સદા મ્લેચ્છતોऽર્થ લભેત્ સાભિમાનઃ ચરેત્ કિંકરેણ વ્રજેત્ કિં વિદેશમ ।

પરાર્થાનનર્થી હરેદ્ ધૂર્તબન્ધુઃ સુતોત્પત્તિસૌખ્યં તમો લાભગશ્ચેત્ ॥ ૧૧॥

દ્વાદશભાવગત રાહુ કે ફલ -

તમો દ્વાદશે દીનતાંપાર્શ્વશૂલં પ્રયત્ને કૃતેऽનર્થતમાતનોતિ ।

ખલૈઃ મિત્રતાં સાધુલોકે રિપુત્વં વિરામે મનોવાંછિતાર્થસ્ય સિદ્ધિમ્ ॥ ૧૨॥

---

કેતુ કે દ્વાદશભાવફલ -

પ્રથમ સ્થાનસ્થ કેતુ ફલ -

તનુસ્થઃ શિખી બાંધવક્લેશકર્તા તથા દુર્જનેભ્યો ભયં વ્યાકુલત્વમ્ ।

કલત્રાદિચિંતા સદોદ્વેગતા ચ શરીરે વ્યથા નૈકધા મારુતી સ્યાત્ ॥ ૧॥

દ્વિતીય ભાવસ્થિત કેતુ ફલ -

ધને કેતુરવ્યગ્રતા કિં નરેશાત્ ધનેધાન્યનાશો મુખેરોગકૃચ્ચ ।

કુટુમ્વાદ્ વિરોધો વચાહ્ સત્કૃતં વા ભવેત્ સ્વેગૃહે સૌમ્યગેહેऽતિસૌખ્યમ્ ॥ ૨॥

તૃતીયસ્થકેતુ કે ફલ -

શિખી વિક્રમે શત્રુનાશં વિવાદં ધનં ભોગમૈશ્વર્યતેજોऽધિકં ચ ।

સુહૃદ્વર્ગનાશં સદા બાહુપીડાં ભયોદ્વેગચિંતાઽકુલત્વં વિધત્તે ॥ ૩॥

ચતુર્થસ્થાનગત કેતુ કે ફલ -
ચતુર્થે ચ માતુઃ સુખેનો કદાચિત્ સુહૃદ્વર્ગતઃ પૈતૃકં નાશયેતિ ।
શસ્ત્રી બન્ધુવર્ગાત્ સુખં સ્વોચ્ચગેહે ચિરં નો વસેત્ સ્વેગૃહે વ્યગ્રતાચેત્ ॥ ૪॥

પંચમસ્થાન કે કેતુ કા ફલ -
યદા પંચમે રાહપુચ્છં પ્રયાતિ તદા સોદરે ઘાતવાતાદિકષ્ટમ્ ।
સ્વબુદ્ધિવ્યથા સંતતં સ્વલ્પપુત્રઃ સ દાસો ભવેદ્ વીર્યયુક્તો નરોઽપિ ॥ ૫॥

ષષ્ઠભાવગત કેતુ કે ફલ -
તમઃ ષષ્ઠભાગેગતે ષષ્ઠભાવે ભવેત્ માતુલાન્ મનભંગો રિપૂણામ્ ।
વિનાશશ્ચતુષ્પાત્ સુખં તુચ્છવિત્તં શરીરં સદાનામયં વ્યાધિનાશઃ ॥ ૬॥

સપ્તમસ્થાનગત કેતુ કા ફલ -
શિખી સપ્તમે ભૂયસી માર્ગચિન્તા નિવૃત્તઃ સ્વનાશોઽથવા વારિભીતિઃ ।
ભવેત્ કીટગઃ સર્વદાલાભકારી કલત્રાદિપીડા વ્યયોવ્યગ્રતા ચેત્ ॥ ૭॥

અષ્ટમભાવગત કેતુ કે ફલ -
ગુદા પીડ્યતેઽર્શારોગૈરવશ્યં ભયં વાહનાદેઃ સ્વદ્રવ્યસ્યરોધઃ ।
ભવેદષ્ટમે રાહુચ્છેઽર્થલાભઃ સદા કીટકન્યાઽજગો યુગ્મગે તુ ॥ ૮॥

નવમભાવગત કેતુ કે ફલ -
શિખી ધર્મભાવે યદાક્લેશનાશઃ સુતાર્થી ભવેત્ મ્લેચ્છતોભાગ્યવૃદ્ધિઃ ।
સહોત્થવ્યથાં બહુરોગં વિધત્તે તપોદાનતો હાસ્યવૃદ્ધિં તદાનીમ્ ॥ ૯॥

દશમભાવગત કેતુ કે ફલ -
પિતુર્નો સુખી કર્મગઃ યસ્ય કેતુઃ દુર્ભગં કષ્ટભાજે કરોતિ ।
તદા વાહને પીડિતં જાતુ જન્મ વૃષાજાલિકન્યાસુ ચેત્ શત્રુનાશમ્ ॥ ૧૦॥

લાભ ભાવગત કેતુ કે ફલ -
સુભાગ્યઃ સુવિદ્યાધિકો દર્શનીયઃ સુગાત્રઃ સુવસ્ત્રઃ સુતેજોઽપિતસ્ય ।
દરે પીડ્યતે સંતતિઃ દુર્ભગા ચ શિખી લાભગઃ સર્વલાભે કરોતિ ॥ ૧૧॥

વ્યયસ્થાનગત કેતુ કે ફલ -
શિખીરિઃફગો વસ્તિગુહ્યાંઘ્રિનેત્રે રુજાપીડાનં માતુલાન્નૈવ શર્મ ।
સદા રાજતુલ્યં સદ્વ્યયં તદ્ રિપૂણાં વિનાશં રણેઽસૌ કરોતિ ॥ ૧૨॥

Encoded and proofread by Radu Canahai clradu at yahoo.com

*chamtkArachintAmaNi by bhattanArAyaNa*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*